"चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः।"
इत्यमरः । १ । ४ । ३१ ॥
(यथा, भावप्रकाशस्य मध्यखण्डे द्वितीये भागे ।
"स्थानान्यामाग्निपक्कानां मूत्रस्य रुधिरस्य च।
हृदुन्दूकः फुस्फुसश्च कोष्ठ इत्यभिधीयते ॥" )
**हृत्कम्पः,** पुं, ( हृदयस्य कम्पः । हृदादेशः । ) हृदयकम्पनम् । । यथा,—
"हृत्कम्पो जायते तावत् यावत् तस्य कृपा न चेत् ॥"
इति समयाचारतन्त्रोक्तं भद्रकालीकवचम् ॥
**हृतं,** त्रि, ( हृ + क्तः । ) अपहृतवस्तु । यथा,—
"पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः ।
त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् ॥"
इति देवीमाहात्म्ये ५ अध्यायः ॥
**हृद्,** क्ली, ( हृ + बाहुलकात् दुक् । ) हृदयम् । मनः । इत्यमरः । २ । ६ । ६४ ॥
**हृदयं,** क्ली, ( ह्रियते विषयैरिति । हृ + "हृञोः पुग्दुकौ च । उणा० ४ । १०० । इति कयन् दुक् च । ) वुक्कम् । वक्षः । मनः । यथा,—
"उरस्यपि च वुक्कायां हृदयं मानसेऽपि च ॥"
इति त्रिकाण्डशेषः ॥
वुक्काग्रमांसं हृदयं हृदिति । चत्वारि हृदये । केचित्तु वुक्कात् पृथगेव हृदयान्तर्गते मांसविशेषे पद्माकारे हृदयादिद्वयमाहुः । धातोरनेकार्थत्वात् । इत्यमरटीकायां भरतः ।२।६।६४॥
अत्र अनाहतनामकद्वादशदलपद्ममस्ति । यथा,
"आधारे लिङ्गनाभौ हृदयसरसिजे तालुमूले ललाटे
द्वे पत्रे षोड़शारे द्विदशदशदले द्वादशार्द्धे चतुष्के ।
वासान्ते वादिलान्ते ड-फ-क-ठसहिते कण्ठदेशे स्वराणां
हक्षौ कोदण्डमध्ये सकलदलगतं वर्णरूपं नमामि ॥"
इति षट्चक्रभेदः ॥
किञ्च ।
"तस्योर्द्ध्वे हृदि पङ्कजं सुललितं बन्धूककान्त्युज्ज्वलं
काद्यैर्द्वादशवर्णकैरुपहितं सिन्दूररागान्वितैः ॥
नामानाहतसंज्ञकं सुरतरुं वाञ्छातिरिक्तप्रदं
वायोर्मण्डलमत्र धूमसदृशं षट्कोणशोभान्वितम् ॥"
इति षट्चक्रक्रमः ॥ * ॥
तस्य शुभाशुभलक्षणं यथा,—
"समोन्नतञ्च हृदयमकम्पंर मांसलं पृथु ।
नृपाणामधमानाञ्च खरलोमशिरालकम् ॥"
इति गारुड़े ६६ अध्यायः ॥
( तथास्य विवृतिः ।
"अर्थे दश महामूलाः समासक्ता महाफलाः ।
महच्चार्थश्च हृदयं पर्य्यायैरुच्यते बुधैः ॥
षड़ङ्गमङ्गविज्ञानमिन्द्रियाण्यर्थपञ्चकम् ।
आत्मा च सगुणश्चेतः चिन्त्यञ्च हृदि संश्रितम् ॥
प्रतिष्ठार्थं हि भावानामेषां हृदयमिष्यते ।
गोपानसीनामागारकर्णिके वार्थचिन्तकैः ।
तस्यापघातान्मूर्च्छायं भेदान्मरणमिच्छति ॥
यद्धि तत् स्पर्शविज्ञानन्धारितन्तत्र संश्रितम् ।
तत्परस्यौजसः स्थानन्तत्र चैतन्यसंग्रहः ॥
हृदयं महदर्थश्च तस्मादुक्ताश्चिकित्सकैः ।
तेन मूलेन महता महामूला मता दश ॥"
इति चरके सूत्रस्थाने त्रिंशेऽध्याये ॥
"हृदयमिति कृतवीर्य्यो बुद्धेर्मनसश्च स्थानत्वात्॥"
इति सुश्रुते शारीरस्थाने तृतीयेऽध्याये ॥
"शोणितकफप्रसादजं हृदयं तदाश्रया हि धमन्यः प्राणवहाः । तस्याधो वामतः प्लीहा फुस्फुसश्च दक्षिणतो यकृत् क्लोम च ॥
तद्धृदयं विशेषेण चेतानास्थानमतस्तस्मिंस्तमसावृते सर्व्वप्राणिनः स्वपन्ति । भवति चात्र ।
पुण्डरीकेण सदृशं हृदयं स्यादधोमुखम् ।
जाग्रतस्तद्विकशति स्वपतश्च निमीलति ॥"
इति च सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥)
**हृदयग्रन्थिः,** पुं, ( हृदयस्य ग्रन्थिरिव अविद्यासम्बन्धेन दुर्म्मोच्यत्वात् । ) हृद्बन्धः । यथा,—
"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः ।
क्षीयन्ते चास्य कर्म्माणि दृष्ट एवात्मनीश्वरे ॥"
इति श्रीभागवते । १ । २।२१ ॥
**हृदयङ्गमं,** क्ली, ( हृदयं गच्छतीति । गम + खच् । मुम् च । ) युक्तियुक्तवाक्यम् । इति भरतः ॥ तत्पर्य्यायः । सङ्गतम् २ । इत्यमरः ।१।६।१८ ॥ ( मनोहरे, त्रि । यथा, कुमारे । २ । १६ ।
"इति तेभ्यः स्तुतीः श्रुत्वा यथार्था हृदयङ्गमाः ।
प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः ॥"
"हृदयङ्गमाः मनोहराः ।" इति तट्टीकायां मल्लिनाथः ॥ )
**हृदयवान्,** [ न् ] त्रि, ( हृदयमस्यास्तीति मतुप् । मस्य वः । ) हृदयालुः । इत्यमरटीकासारसुन्दरी ॥
**हृदयस्थानं,** क्ली, ( हृदयस्य स्थानम् । ) वक्षःस्थलम् । तत्पर्य्यायः । क्रोड़म् २ उरः ३ वक्षः ४ वत्सम् ५ भुजान्तरम् ६ । इति हेमचन्द्रः ॥
**हृदयात्मा,** [ न् ] पुं, हृदयमेव आत्मा प्रधानदेहभागो यस्य । ) कङ्कपक्षी । इति शब्दचन्द्रिका ॥
**हृदयालुः,** त्रि, (प्रशस्तहृदयमस्यास्तीति । हृदय + ५ । २ ।१२२ । इत्यत्र "हृदयाच्चालुरन्यतरस्याम् ।" इति काशिकोक्तेः आलुः । ) प्रशस्तमनाः । तत्पर्य्यायः । सुहृदयः २ । इत्यमरः । ३ ।१।३ ॥ सहृदयः ३ । इति भरतः ॥ हृदयी ४ हृदयिकः ५ हृदयवान् ६ । इति टीकान्तरम् ॥ चिद्रूपः ७ । इति जटाधरः ॥
**हृदयिकः,** त्रि, ( प्रशस्तं हृदयमस्यास्तीति । हृदय + ठन् । ) हृदयालुः । इत्यमरटीकासारसुन्दरी ॥
**हृदयी,** [न्] त्रि, ( प्रशस्तं हृदयमस्यास्तीति । इनिः । ) हृदयालुः । इति जटाधरः ॥
**हृदयेशः,** पुं, ( हृदयस्य ईशः । ) भर्त्ता । इति त्रिकाण्डशेषः ॥ तत्पर्य्यायः ।
"प्रेयस्याद्याः पुंसि पत्यौ भर्त्ता सेक्ता पतिर्व्वरः ।
विवोढ़ा रमणो भोक्ता रुच्यो वरयिता धवः ॥"
इति हेमचन्द्रः ॥
**हृदयेशा,** स्त्री, ( हृदयस्य ईशा ।) भार्य्या । यथा,
"प्रेयसी दयिता कान्ता प्राणेशा वल्लभा प्रिया ।
हृदयेशा प्राणसमा प्रेष्ठा प्रणयिनी च सा ॥"
इति हेमचन्द्रः ॥
**हृदावर्त्तः,** पुं ( हृदयस्थितः आवर्त्तः । ) अश्वहृदयावर्त्तः । तत्पर्य्यायः । श्रीहस्तकः २ । इति त्रिकाण्डशेषः ॥
**हृदिस्पृक्,** [श्] त्रि, ( हृदि हृदये स्पृशतीति । स्पृश् + क्विन् । "हृद्द्युभ्यां ङेः ॥" ६ । ३ । ८ । इत्यस्य वार्त्तिकात् अलुक्समासः । ) हृद्यः । इति केचित् ॥ ( यथा, भागवते । ६ । १४ । ४३ ।
" यो दुस्त्यजान् दारसुतान् सुहृद्राज्यं हृदिस्पृशः ।
जहौ युवैव मलवदुत्तमश्लोकलालसः ॥")
हृदयस्पर्शकर्त्ता च ॥
**हृद्गोलः,** पुं, पर्व्वतविशेषः । इति केचित् ॥
**हृद्गोलीयः,** त्रिः, (हृद्गोलोऽभिजनोऽस्येति । छः ।) हृद्गोलपर्व्वतोद्भवः । इति केचित्
**हृद्ग्रन्थः,** पुं, ( हृत् हृदयं ग्रथ्नातीति । ग्रन्थ + अच् । ) हृद्व्रणः । इति राजनिर्घण्टः ॥
**हृद्यं,** क्ली, ( हृदयस्य प्रियं मनोज्ञत्वात् । हृदय + "हृदयस्य हृल्लेखयदण् लासेषु ।" ६।३।५० । इति यत् हृदादेशश्च । ) गुड़त्वक् । इति शब्दरत्नावली ॥
**हृद्यः,** पुं, ( हृदय + यत् । हृदादेशः । ) वशकृद्वेदमन्त्रः । इति मेदिनी ॥
**हृद्यः,** त्रि, (हृदयस्य प्रियमिति । हृदय + "हृदयस्य हृल्लेखयदण्लासेषु ।" ६ । ३ । ५० । इति यत् हृदादेशश्च । ) मनोहरः । इत्यमरः । ३।१।५३ ॥ अस्य पर्य्यायः मनोज्ञशब्दे द्रष्टव्यः ॥ हृज्ज्ञः । हृद्धितः । हृत्प्रियः । इति मेदिनी ॥ ( यथा, मनौ । ३ । २२७ ।
"भक्ष्यं भोज्यञ्च विविधं मूलानि च फलानि च ॥
हृद्यानि चैव मांसानि पानानि सुरभीणि च ॥")
**हृद्यगन्धं,** क्ली, ( हृद्यो गन्धोऽस्य ।) क्षुद्रजीरकम् । इति शब्दचन्द्रिका ॥ सौवर्च्चलम् । इति राजनिर्घण्टः ॥
**हृद्यगन्धः,** पुं, (हृद्यो मनोहरो गन्धोऽस्य । बिल्ववृक्षः । इति जटाधरः ।
**हृद्यगन्धा,** स्त्री, ( हृद्यो गन्धोऽस्याः । ) जाती । इति राजनिर्घण्टः ॥
**हृद्यगन्धि,** क्ली, ( हृद्यो गन्धोऽस्य । इत् समासान्तः । ) क्षुद्रजीरकम् । इति रत्नमाला ॥
**हृद्या,** स्त्री,(हृद + यत् । टाप् ।) वृद्धिनामौषधिः । इति मेदिनी ॥